PVG's

# Muktangan English School & Jr. College, Pune - 9

## Terminal Examination (2024-25)
## Standard - X

**Subject - SANSKRIT (ENTIRE)** | **Marks - 80**
**Date - 22-10-2024** | **Time - 8.00 a.m. to 10.00 a.m.**

## प्रथमः विभागः - सुगमसंस्कृतम् (०८)

**प्र.१ (अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४)** (४)

१

२

३

४

५


**(आ) सङ्ख्या अक्षरैः अङ्कैः वा लिखत। (३ तः २)** (२)

१) ५१ २) ९५ ३) पञ्चाशत्

**(इ) समय स्तम्भमेलनं कुरुत। (५ तः ४)** (२)

| अ | ब |
|---|---|
| १) पञ्चोन नववादनम् | २.२० |
| २) सार्ध एकादशवादनम् | ६.१५ |
| ३) विंशत्यधिक द्विवादनम् | ४.४५ |
| ४) सपाद षड्वादनम् | ११.३० |
| ५) पादोन पञ्चवादनम् | ८.५५ |

## द्वितीयः विभागः - गद्यम् (२०)

**प्र.२ (अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

अर्णवः - पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया। कियन्तः सूक्ष्माः तस्य परागकणाः !

पिता - सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि! (अर्णवः तथा करोति।)

पिता - किं दृष्टं त्वया ?

अर्णवः - पितः, अद्‌भुतं तत्. सूक्ष्मकणेषु तस्य अङ्गानि दृश्यन्ते।

पिता - अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि । परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम् । ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते ।

अर्णवः - परमाणुः नाम किम् ?

पिता - अस्तु । कथयामि । मुष्टिमात्रान् तण्डुलान् महानसतः आनय ।

अर्णवः - (तथेति उक्त्वा पाकगृहात् तणडुलान् आनयति।) स्वीकरोतु, तात ।

पिता - अधुना इमं तण्डुलं विभज।

**(१) अवबोधनम् । (४ तः ३)** **(३)**

**१) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

१) एतद् विश्वं ........ निर्मितम् । (परमाणुभ्यः / तण्डुलैः)

**२) एकवाक्येन उत्तरत। -** अर्णवः उद्यानात् किम् आनीतवान् ?

**३) सत्यम् असत्यं वा इति वाक्यं पुनर्लिखित्वा लिखत । -**

जपाकुसुमस्य परागकणाः सूक्ष्माः ।

**(२) शब्दज्ञानम् । (३ तः २)** **(२)**

१) गद्यांशात् द्वे अव्यये चिनुत ।

**२) अधोरेखितपदमाधृत्य प्रश्ननिर्माणं कुरुत ।**

सूक्ष्मकणेषु पुष्पस्य अङ्गानि दृश्यन्ते।

**३) चतुर्थपदं लिखत ।**

पिता : मग्नः :: परागकणा :: ........ ?

**(३) पृथक्करणम् ।** **(२)**

**१) क्रमेण योजयत ।**

१) अर्णवः पाकगृहात् तण्डुलान् आनयति ।
२) अर्णवः सूक्ष्मेक्षिकया परागकणान् पश्यति ।
३) अर्णवः उद्यानात् जपाकुसुमम् आनयति ।
४) पिता परमाणुविषये कथयति ।

**प्र. २ (आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम् । तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र ! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत् । तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि । अतः धनुः त्यज । खनित्राणि हलान्, कुद्दालकानि लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

**(१) अवबोधनम् । (४ तः ३)** **(३)**

**(१) कः कं वदति इति वाक्यं पुनर्लिखित्वा लिखत ।**

''त्वं तु प्रजाहितदक्षः नृपः । ''

**(२) पूर्णवाक्येन उत्तरं लिखत । -**

का स्त्रीरूपं धृत्वा प्रकटिता अभवत् ?

**(३) सत्यम् असत्यं वा इति वाक्यं पुनर्लिखित्वा लिखत । -**

वेनराजा आदर्शः राजा ।

**(४) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यतः

१) वेनभूपः दुःशासकः आसीत् ।

२) भूमिः स्वभावेन कृपणा आसीत् ।

**(२) शब्दज्ञानम् । (३ तः २)** **(२)**

**१)** गद्यांशात् द्वे सप्तमी - विभक्त्यन्तपदे चित्वा लिखत ।

**२) लकारं लिखत ।**

अतः धनुः <u>त्यज</u> ।

३) **सन्धिविग्रहं कुरुत । -**

नाकरोत् = ........ + ........

**(३) पृथक्करणम् । जालरेखाचित्रं पूरयत ।** **(२)**




**प्र. २ (इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** **(४)**

१) शक्रः - गोसहस्रमिति ? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः - किं नेच्छति भवान् ? अपर्याप्तं कनकं ददामि ।

शक्रः - गृहीत्वा गच्छामि । नेच्छामि कर्ण, नेच्छामि ।

अथवा

२) रदनिका - एहि वत्स! शकटिकया क्रीडावः।

दारकः - (सकरुणम् ) रदनिके! किं मम एतया मृत्तिकाशकटिकया; तामेव सौवर्णशकटिकां देहि।

रदनिका - (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः ?

**प्र. २ (ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** **(२)**

१) सुदासः सुगतचरणाभ्यां कमलं किमर्थं समर्पितवान् ?

२) दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते ?

## तृतीयः विभागः - पद्यम् (१८)

**प्र. ३ (अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

१) यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वापि तादृशं लभते फलम् ।।

२) अल्पानामपि वस्तूनां संहतिः कार्यसाधिका:।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।।

३) रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि ।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
क्रियासिध्दिः सत्त्वे भवति महतां नोपकरणे ।।

**प्र. ३ (अ)**

**(१) पूर्णवाक्येन उत्तरत । (केवलम् १)** **(१)**

१) का कार्यसाधिका भवति ?
२) कर्षकः कीदृशं फलं लभते ?

**(२) सन्धिविग्रहः कुरुत ।** **(१)**

क्षेत्रमासाद्य - ........ + ........

**(३) समानार्थकशब्दान् लिखत ।** **(१)**

अ) कर्षकः - ........ ब) तुरगः - ........

**(४) जालरेखाचित्रं पूरयत ।** **(१)**

| | |
|---|---|
| निरालम्ब | .......... |
| .......... | तुरगाः |
| चरणविकलः | .......... |
| .......... | चक्रम् |

**प्र. ३ (आ) माध्यमभाषया उत्तरं लिखत । (२ तः १)** **(२)**

१) कदा मदः व्यपगच्छति ?
२) नारिकेलाः नराणाम् उपकारं कथं स्मरन्ति ?

**प्र. ३ (इ) पद्ये शुध्दे पूर्णे च लिखत । (क, ख तः १, ग,घ तः १)** **(६)**

१) क) निन्दन्तु ........ ख) प्रथमवयसि ........
२) ग) तावद् ........ घ) उत्तमो ........

**प्र. ३ (ई) अन्वयं पूरयत ।** **(२)**

उत्तमः ........ न स्यात्, ........ बहु भाषते। ........ कांस्ये (ध्वनिः) प्रजायते ........ सुवर्णे ध्वनिः न (प्रजायते) ।

**प्र. ३ (उ) माध्यमभाषया सरलार्थं लिखत । (३ तः २)** **(४)**

१) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।

२) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।

३) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।

## चतुर्थः विभागः - लेखनकौशलम् । (९)

**प्र. ४ (अ) अव्ययानां / धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत । (५ तः ४)** **(४)**

(१) सह (२) अभितः (३) पुरतः (४) याच् (५) दा-यच्छ्

**अथवा**

**संस्कृतानुवादं कुरुत । (६ तः ४)**

1) Mother washes her child's shirt.
2) I always speak the truth.
3) The servants serve the food.
4) She studies in the morning.
5) The elephant is black and big.
6) There are white clouds in the sky.

**(आ) ५-८ वाक्यात्मकं निबन्धं लिखत । (३ तः १)** **(५)**

१) मम प्रिया भाषा । २) मम प्रियः उत्सवः । ३) भारतीय प्रसिद्धं स्थलम् ।

**अथवा**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।**



**(मञ्जूषा -** ग्रामस्य, कुटीरः, कुम्भकारः, घटम्, महिला, घटाः, रचयति, भूषयति, बालिका, क्रीडति, वृक्षः, आलेखति**)**

## पञ्चमः विभागः - भाषाभ्यासः (१७)

**प्र. ५ (अ) तालिकापूर्तिं कुरूत । (४ तः ३)**

**(१) नाम- तालिका पूरयत । (६ तः ४)** **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| दिशः | .......... | .......... | षष्ठीः |
| .......... | .......... | जन्मभ्यः | चतुर्थी |
| .......... | माले | .......... | प्रथमा |

**(२) सर्वनाम- तालिका पूरयत । (६ तः ४)** **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| त्वया | .......... | .......... | तृतीया |
| .......... | भवतोः | .......... | सप्तमी |
| .......... | .......... | काः | द्वितीया |

**(३) क्रियापदतालिकां पूरयत । (६ तः ४)** **(२)**

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | लकारः |
|---|---|---|---|---|
| कुरुष्व | .......... | .......... | मध्यम पु. | लोट् |
| .......... | .......... | अखादन् | प्रथम पु. | लङ् |
| पश्यामि | .......... | .......... | उत्तम पु. | लट् |

**(४) धातुसाधित - विशेषण - तालिकां पूरयत । (६ तः ४)** **(२)**

| धातुः, | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| १) पठ् (१ प.प.) | पठितः | .......... | पाठ्य | .......... |
| २) आ + दिश् (६ उप). | .......... | आदिष्टवान् | .......... | आदिशन् |
| ३) लभ् (१ आ.प.) | लब्धः | लब्धमान् | .......... | .......... |

**प्र. ५ (आ) निर्दिष्टाः कृतीः कुरुत । (४ तः ३)** **(९)**

**(१) योग्य रुपं लिखित्वा रिक्तस्थानपूर्ति कुरुत । (५ तः ३)**

१) सप्ताहस्य ..........(३) संस्कृतवर्गः भवति ।

२) भवने मम गृहं .......... (७) तले वर्तते ।

३) .......... (४) वेदाः वर्तन्ते ।

४) दिनस्य .......... (९) लोकयानम् आगच्छति ।

**(२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)**

| सामासिकपदम् | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| १) क्रियासिद्धिः | .......... | षष्ठी तत्पुरुषः |
| २) .......... | प्रिया भाषा | कर्मधारय |
| ३) क्षुद्रबुद्धिः | .......... | बहुव्रीहिः |
| ४) .......... | दिने दिने | अव्ययीभावः |
| ५) काकबलिः | .......... | चतुर्थी तत्पुरुषः |

**(३) समानार्थक शब्दान् / विरुध्दार्थक शब्दान् लिखत । (५ तः ३)**

१) सूक्ष्माः X .......... २) नीरजम् = .......... ३) भूमिः = ..........

४) पुरतः X .......... ५) गजः = ..........

**(४) सूचनानुसारं कृतीः कुरुत । (५ तः ३)**

१ ) मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्।
**(त्वान्त - अव्ययं निष्कास्य लिखत।)**

२) स्वयं मृतः असि । **(लङ्‌लकारे लिखत।)**

३) त्वं पादान्स्तब्धीकृत्य तिष्ठ । **('त्वम्' इत्यस्य स्थाने 'भवान्' इति योजयत।)**

४) महाविद्यालयेषु कणादविषयकाणि पुस्तकानि सन्ति । **(एकवचने लिखत।)**

५) सम्यक् उक्तं त्वया । **(वाच्यपरिवर्तनं कुरुत।)**

## षष्ठः विभागः - अपठितम् (८)

**प्र. ६ (अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)**

हिमालयः भारतस्य उत्तरदिशायां स्थितः । अस्य शिखराणि सर्ववर्षं हिमेन आच्छादितानि सन्ति । अत एव तु अयं हिमस्य आलयः इति हिमालयः भवति । ग्रीष्मस्य तापेन तप्ताः जनाः प्रतिवर्षं ग्रीष्मे तत्र गच्छन्ति । अनेके रुग्णाः जनाः अपि तस्य पवित्रे वातावरणे स्वस्थाः भवन्ति । अत्र अनेकानि दर्शनीयानि स्थानानि अपि सन्ति । जनाः बद्रिनाथे केदारनाथे च ईश्वरस्य दर्शनं कुर्वन्ति । हिमालयात् एव गङ्गा, चन्द्रभागा इत्यादयः नद्यः प्रवहन्ति ।

**(१) एकवाक्येन उत्तरत । -** तापेन तप्ताः जनाः कुत्र गच्छन्ति ?

**(२) प्रातिपदिकं लिखत । -** १) बद्रिनाथे - २) हिमालयात् -

**(३) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत । -** हिमालये वातावरणं पवित्रं भवति।

**(४) माध्यमभाषया सरलार्थं लिखत । -** हिमालयः भारतस्य उत्तरदिशायां स्थितः ।

**(५) कारकपरिचयं कुरुत । -** अत्र अनेकानि दर्शनीयानि स्थानानि अपि सन्ति ।

**(६)** गद्यांशात् एकम् अव्ययं चित्वा लिखत ।

**प्र. ६ (आ) पद्यांशं पठित्वा कृतीः कुरुत । (४)**

काकचेष्टा बकोध्यानं श्वाननिद्रा तथैव च ।
अल्पाहारी गृहत्यागी विद्यार्थीपञ्चलक्षणम् ।।

**(१) पूर्णवाक्येन उत्तरत - (१)**
श्लोके कस्य लक्षणानि सन्ति ?

**(२) समानार्थकं शब्दं लिखित । -** विद्यार्थी - .......... । **(१)**

**(३) जालरेखाचित्रं पूरयत। (२)**




❖❖❖❖❖